**संस्कृत-वार्ता:**

**दिनाङ्क :.02.01.2026** **सायम् - 06:20**

**आदौ मुख्यवार्ता:**

- विदेशमन्त्री एस. जयशङ्करः अवदत् यत् भयोत्पादनस्य विरुद्धं स्वसंरक्षणस्य अधिकारः भारतस्य अस्ति, भारतं कथं स्वसंरक्षणम् आचरेत् इति निर्देश: कुतश्चिदपि न सहिष्यते इति।

- निर्वाचन-आयोगेन दशाधिक द्विसहस्रतमवर्षात् परं पश्चिमवङ्ग- प्रशासनेन प्रदत्तानि अन्य-अनुसूचित -वर्ग- प्रमाणपत्राणि निरस्तीकृतानि।

- इलेक्ट्रानिक्स्-यन्त्रांश-निर्माण-योजनायाः तृतीयभागस्य अन्तर्गतं एक चत्वारिंशत् सहस्र कोटितोप्यधिक रुप्यकाणां द्वाविंशति: परियोजना केन्द्रेन अनुमोदिता।

- मुम्बई- अहमदाबाद बुलेट-रेल-परियोजना सफलतया कीर्तिमानम् अवाप्नोत्।

- भारतीय-ऋतु -विज्ञान- विभागेन, अद्य दिल्ली, हरियाणा, पञ्जाब, ओडिशा, राजस्थान, चण्डीगढ-इत्येतेषु प्रदेशेषु अति नीहारच्छादनं भविष्यतीति अनुमानितम्।

**जयशङ्करः चेन्नई**

विदेशमन्त्री एस्. जयशङ्करः अवदत् यत् भयोत्पादनस्य विरुद्धं स्वसंरक्षणस्य अधिकारः भारतस्य अस्ति, भारतं कथं स्वसंरक्षणम् आचरेत् इति निर्देश: कुतश्चिदपि न सहिष्यते इति। चेन्नई नगरे आई आई टी मद्रास टेक्नो एंटरटेंमेंट उत्सव – शास्त्र षट्विंशत्यधिकद्विसहस्र इत्यस्य उद्घाटने भाषमाणः , सः अवदत् यत् भारतं स्वस्य सुरक्षायै यत् आवश्यकं तत् करिष्यति इति। समीपस्थ - देशस्य नीतिं कथयन्, विदेश-कार्यमन्त्री अवदत् यत् शत्रु-प्रतिवेशिनां भयोत्पादनस्य विरुद्धं स्वसंरक्षणस्य अधिकारः भारतस्य अस्ति इति। सः अवदत् यत् निरन्तरं भयोत्पादनं सौहार्दं न्यूनं करोति, जलविभाजन-व्यवस्थां च निष्प्रभावयति।

**निर्वाचन-आयोग**

निर्वाचन-आयोगेन निर्देशः प्रख्यापित: यत् दशाधिक द्विसहस्रतमवर्षात् परं पश्चिमवङ्ग- प्रशासनेन प्रदत्तानि अन्य-अनुसूचित -वर्ग- प्रमाणपत्राणि , विशेष-गहन-पुनरीक्षण-सम्बद्ध-निर्वाचक-सूच्यां अभियोगानां आक्षेपानां च निराकरणकाले वैध-परिचयपत्राणि न मन्यन्ते इति। पदक्षेपोऽयं गतवर्षे दिसंबर-मासस्य चतुर्विंशतिः दिनाङ्के कलकत्तानगरस्य उच्चन्यायालयस्य तस्य आदेशस्य अनन्तरम् आगतम् अस्ति यत्र दशाधिक द्विसहस्रतमवर्षात् चतुर्विंशत्यधिक द्विसहस्रतमवर्ष पर्यन्तं

प्रदत्तानां त्रयोदशधिकैकशत -समुदायानां अन्य-अनुसूचित-वर्ग-प्रमाणपत्राणां वैधानिक-वैधतायाः अपूर्णतायाः कारणात् निरस्तीकरणमभवत्।

निर्वाचन-आयोगः स्पष्टम् अकरोत् यत् अन्य-अनुसूचित-वर्ग-समुदायस्य जनाः योग्याः मतदातारः सन्ति, परन्तु दशाधिक द्विसहस्रतमवर्षात् परं तेषां प्रमाणपत्राणि निर्वाचन-सम्बद्ध-विषयेषु परिचयपत्ररूपेण अथवा समुदाय-वर्गस्य प्रमाणरूपेण उपयोक्तुं न शक्यन्ते इति।

**इलेक्ट्रानिक्स्-यन्त्रांश**

इलेक्ट्रानिक्स्-यन्त्रांश-निर्माण-योजनायाः तृतीयभागस्य अन्तर्गतं द्वाविंशतिः नूतनप्रस्तावः केन्द्रेन अनुमोदितः, यस्मिन् त्रिषष्ट्यधिक अष्टशताधिक एक चत्वारिंशत् सहस्र कोटिरूप्यकाणां परिकल्पितः निवेशः अन्तर्भवति। एतेषु अनुमोदनेषु मोबाइल-निर्माणम्, दूरसञ्चारम्, उपभोक्तृ-इलेक्ट्रानिक्स्, व्यूहात्मक-इलेक्ट्रानिक्स्, आटोमोटिव्, आई. टी. हार्डवेयर इत्यादीनां एकादश लक्ष्य-खण्ड-उत्पादानां निर्माणम् अन्तर्भवति। एतानि परियोजनानि अष्ट पंचाशत सहस्राधिक द्विलक्षाधिक सहस्र-कोटिरूप्यकाणां उत्पादनं जनयितुं, प्रायः चतुः त्रिंशत् सहस्रं प्रत्यक्ष-कार्यस्थानानि जनयितुं च अपेक्षन्ते।

**अश्विनी वैष्णवः**

रेलमन्त्री अश्विनी वैष्णवः अद्य अवोचत् यत् मुम्बई- अहमदाबाद बुलेट-रेल-परियोजना महाराष्ट्रस्य पालघर नगरे -विरार-बोय्सर-नगरयोः मध्ये प्रायः एक दशांशः पंच कि. मी. परिमितेः द-टनेल इत्यस्य सफलतया प्रमुखं लक्ष्यम् अवाप्नोत्। महाराष्ट्रस्य पालघर-नगरे हाई-स्पीड-टनेल-ब्रेक्थ्रू-कार्यक्रमम् आभासीय -माध्यमेन सम्बोधयन् श्री वैष्णवः अवदत् यत् अस्यां परियोजनायां आहत्य सप्त पर्वत-सुरङ्गाः, एकः समुद्र-सुरङ्गः च वर्तते। सः अवदत् यत्, एतत् महाराष्ट्रस्य द्वितीयं पर्वतीय -सुड़ङ्गमार्गम् अस्ति इति। मन्त्री अवदत् यत् बुलेट-रेल मध्यमवर्गस्य कृते सुलभं सुविधाजनकं च परिवहन-साधनरूपेण कार्यं करिष्यति इति।

मन्त्री अवोचत् यत् अगस्त मासस्य पंचदश दिनांकं यावत् भारतस्य प्रथमं बुलेट रेलयानम् निर्मितं भविष्यति।

**ऋतु विभाग**

भारतीय-ऋतु-विज्ञान- विभागेन, अद्य दिल्ली, हरियाणा, पञ्जाब्, ओडिशा, राजस्थान, चण्डीगढ-इत्येतेषु प्रदेशेषु अति नीहारच्छादनं भविष्यतीति अनुमानितम् । बिहार, हिमाचलप्रदेशः, जम्मू-कश्मीर, लद्दाख्, गिल्गित-बाल्टिस्तान, मुज़फ़्फ़राबाद इत्येतेषु प्रदेशेषु अग्रिमेषु त्रिषु दिनेषु नीहारच्छादनस्य पूर्वानुमानम् अपि भारत-ऋतु -विज्ञान- विभागेन प्रकटितम्। अस्य मासस्य षड् दिनाङ्कपर्यन्तं उत्तरप्रदेशे, उत्तराखण्डे, पश्चिमवङ्गदेशे, सिक्किम्-राज्ये, उत्तरपूर्व राज्येषु च एतादृशी एव स्थितिः प्रवर्तते। अत्रान्तरे, तमिल्नाडु, पुदुचेरी, करैकल इत्येतेषु प्रदेशेषु मेघस्फोटस्य च पूर्वानुमानं कृतम् अस्ति। एतत्-अतिरिच्य दिल्ली-एन्. सी. आर्. मध्ये वायु गुणवत्ता निकृष्टवर्गे एव अस्ति।

**ताइवान–चीन विषयः**

ताइवान् राष्ट्रपतिः लाइ चिङ्-ते उक्तवान् यत् ताइवान् स्वस्य सार्वभौमत्वस्य रक्षणे तथा राष्ट्रीयरक्षाशक्तेः वर्धने दृढसंकल्पितः अस्ति। चीनदेशस्य वर्धमानविस्तारनीतिम् उद्दिश्य एवमुक्तं। बीजिङ्-शासनात् ताइवानस्य समीपे सैनिकाभ्यासेषु क्षेपणास्त्राणि प्रक्षिप्तानि । राष्ट्रपतिः अवदत् यत् अन्तरराष्ट्रीयसमुदायः पश्यति यत् ताइवानीयजनाः आत्मरक्षणे कियत् धैर्यं संकल्पं च धारयन्ति इति । सः उक्तवान् यत् राष्ट्रपतिरूपेण मम स्थितिः सदा स्पष्टा अस्ति। राष्ट्रस्य सार्वभौमत्वं दृढतया रक्षितव्यं, राष्ट्रीयरक्षा च सुदृढीकर्तव्या इति तस्य अभिप्रायः आसीत् यत् षड्विंशत्युत्तरद्विसहस्रसंवत्सरः ताइवान देशस्य कृते निर्णायकः भविष्यति। अतः दुष्टपरिस्थितेः कृते पूर्वतया योजना कर्तव्या, उत्तमफलस्य आशा तु स्थापनीया इति। अनन्तरं अमेरिकाविदेशविभागेन उक्तं यत् चीनदेशस्य ताइवानस्य समीपे तथा अन्येषु क्षेत्रेषु सैनिकक्रियाः अनावश्यकतया तन्यतां वर्धयन्ति। बीजिङ्-शासनं सैनिकाभ्यासं त्वरितं निरोधनीयम् इत्यपि अकथयत्।

**अन्तारार्ष्ट्रीययुवानां नौकायान-रेगा[illegible]-क्रीडा**

भारतीय अन्तारार्ष्ट्रीययूनां नौकायान-रेगाटा-क्रीडा षट्विंशत्यधिकद्विसहस्र-तमवर्षे आधिकारिकरीत्या चतुर्थ दिनांकातः जनवरी मासस्य दश दिनांक पर्यन्तं चेन्नई जलांतर्गामिनी इत्यत्र भविष्यति। ह्यः चेन्नईनगरे प्रतिस्पर्धा आरम्भः अभवत्। एषः भारतस्य दीर्घतमः, सुसंगतः च अन्तारार्ष्ट्रीययूनां नौकायान-रेगाटा-क्रीडास्ति।

**संस्कृत-साप्ताहिकी**

प्रियाः श्रोतारः, संस्कृत-जगता सम्बद्धैः विभिन्नैः क्रिया-कलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ्.एम्.गोल्ड्-प्रवाहिकातः रविवासरे मध्याह्ने विंशति-निमेषाधिकैक-वादनतःभविष्यति। कृपया श्रृण्वन्तु।